# ॥ श्री चन्द्रशेखरभारती सद्गुरुपादुका स्तवराजः ॥

श्रीमच्छृङ्गगिरावधिष्ठितवतो व्याख्यानसिंहासनम्
श्रीविद्यामनुजापनिर्मलतरस्वान्तस्य शान्तात्मनः ।
श्रेयः सन्ततिसम्प्रदानकलनाकल्पद्रुलीलाजुषः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

वेदान्ताम्बुधिमन्थनोद्यतमनोमन्थानसम्पादित
ब्रह्मानन्दसुधाझरीरसभरास्वादप्रसन्नात्मनः ।
वाग्वैखर्यभिभूतवैबुधमहाचार्यस्य साधीयसः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

कारुण्यामृतपूरपूरितहृदः कल्याणपारम्परी
केलीमन्दिरतामुपाश्रितवतः कामान्तकोपासितुः ।
काषायाङ्कितवाससः करलसद्दण्डस्य कान्ताकृतेः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

वेदान्तध्वनिघोषिणो बुधमयूराणां मनस्तोषिणः
विद्यासस्यविपोषिणः स्वजनतासन्तापविद्वेषिणः ।

अद्वैतामृतवर्षिणो जलधरस्यानन्दसन्दायिनः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

संसाराम्बुधिपारलंघनकलाजंघालतामीयुषः
सर्वाम्नायरहस्यबोधनविधौ वैदग्ध्यमासेदुषः ।
वैराग्यैकनिकेतनस्य विबुधव्रातैकरक्षामणेः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

जीवन्मुक्तिसुखानुभूतिलहरीमामज्ज्यमानान्तरो
ऽप्यात्मानं जडबालमूकबधिरोन्मत्तादिवद्दर्शयन् ।
योऽयं व्यञ्जयति क्रमेण भरतादीनां स्थितिं तादृशः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

सङ्गीं बाध्यत एव लोक इति वा वैयासिकं यद्वचः
तस्याप्यद्भुतगौरवं विशदयन्सङ्गं त्यजंल्लौकिकम् ।
स्वात्मानन्दरसानुभूतिभरितो बाभाति यस्तादृशः
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

आलापैरनवद्यसूक्तिभरितैरानन्दसन्दायिभिः

ब्रह्मात्मानुभवप्रकाशनपरैः स्वैरोद्गतैः सुस्वरैः ।
बालोन्मत्तविडम्बनव्यतिकरे व्यावृण्वतो नैपुणीम्
श्रीमच्चन्द्रकिशोरशेखरगुरोः श्रीपादुका मे गतिः ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]